नौका
ॐवेदा यो वीनां पदमन्तरिक्षेण पतताम् । वेद नावः समुद्रियः ।। - ऋग्वेद १.२५.७
ॐअनु स्वधामक्षरन्नापो अस्याऽवर्धत मध्य आ नाव्यानाम् । सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ।। - ऋ. १.३३.११
ॐआ नो नावा मतीनां यातं पाराय गन्तवे । युञ्जाथामश्विना रथम् ।। - ऋ. १.४६.७
ॐवि ते वज्रासो अस्थिरन्नवतिं नाव्या३ अनु । महत् त इन्द्र वीर्यं बाह्वोस्ते बलं हितमर्चन्ननु स्वराज्यम् ।। - ऋ. १.८०.८
ॐद्विषो नो विश्वतोमुखाति नावेव पारय । अप नः शोशुचदघम् ।। स नः सिन्धुमिव नावयाति पर्षा स्वस्तये । अप नः शोशुचदघम् ।। - ऋ. १.९७.७-८
ॐजातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः । स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ।। - ऋ. १.९९.१
ॐतुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः । तमूहथुर्नौभिरात्मन्वतीभिः अन्तरिक्षप्रुद्भिरपोदकाभिः ।। - ऋ. १.११६.३
ॐअनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे । यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम् ।। - ऋ. १.११६.५
ॐत्वं सूरो हरितो रामयो नॄन् भरच्चक्रमेतशो नायमिन्द्र । प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून् ।। - ऋ. १.१२१.१३
ॐविश्वेषु हि त्वा सवनेषु तुञ्जते समानमेकं वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक् । तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि । इन्द्रं न यज्ञैश्चितयन्त आयवः स्तोमेभिरिन्द्रमायवः ।। - ऋ. १.१३१.२
ॐरथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने । अस्माकं वीराँ उत नो मघोनो जनाँश्च या पारयाच्छर्म या च ।। - ऋ. १.१४०.१२
ॐअवविद्धं तौग्र्यमप्स्व१न्तरनारम्भणे तमसि प्रविद्धम् । चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयन्ति ।। - ऋ. १.१८२.६
ॐप्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः । कुविन्नो अस्य वचसो निबोधिषदिन्द्रमुत्सं न वसुनः सिचामहे ।। - ऋ. २.१६.७
ॐनावेव नः पारयतं युगेव नभ्येव न उपधीव प्रधीव । श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान् ।। - ऋ. २.३९.४
ॐकनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम् । सुमङ्गलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत् ।। - ऋ. २.४२.१
ॐविवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः । अंहसो यत्र पीपरद् यथा नो नावेव यान्तमुभये हवन्ते ।। - ऋ. ३.३२.१४
ॐविश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरिताति पर्षि । अग्ने अत्रिवन्नमसा गृणानो३ ऽस्माकं बोध्यविता तनूनाम् ।। - ऋ. ५.४.९
ॐएवाँ अग्निं वसूयवः सहसानं ववन्दिम । स नो विश्वा अति द्विषः पर्षन्नावेव सुक्रतुः ।। - ऋ. ५.२५.९
ॐआ सूर्यो अरुहच्छुक्रमर्णो ऽयुक्त यद्धरितो वीतपृष्ठाः । उद्ना न नावमनयन्त धीरा आशृण्वतीरापो

अर्वागतिष्ठन् ।। - ऋ. ५.४५.१०

ॐव्य१क्तून् रुद्रा व्यहानि शिक्वसो व्य१न्तरिक्षं वि रजांसि धूतय: । वि यदज्राँ अजथ नाव ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ ।। - ऋ. ५.५४.४

ॐअमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती । दूरेदृशो ये चितयन्त एमभिरन्तर्महे विदथे येतिरे नर: ।। - ऋ. ५.५९.२

ॐयास्ते पूषन्नावो अन्त: समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति । ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमान: ।। - ऋ. ६.५८.३

- - - - - - - - - - - - - - -- - - - - - - - - - -

नौका

वेदा यो वीनां पदमन्तरिक्षेण पतताम् । वेद नावः समुद्रियः ।।७।। – ऋ. १.२५.७
अनु स्वधामक्षरन्नापो अस्याऽवर्धत मध्य आ नाव्यानाम् ।
सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन हन्मनाहन्नभि द्यून् ।।११।। – ऋ. १.३३.११
आ नो नावा मतीनां यातं पाराय गन्तवे । युञ्जाथामश्विना रथम् ।।७।। – ऋ. १.४६.७
वि ते वज्रासो अस्थिरन्नवतिं नाव्या३ अनु ।
महत् त इन्द्र वीर्यं बाह्वोस्ते बलं हितमर्चन्ननु स्वराज्यम् ।।८।। – ऋ. १.८०.८
द्विषो नो विश्वतोमुखाति नावेव पारय । अप नः शोशुचदघम् ।।७।।
स नः सिन्धुमिव नावयाति पर्षा स्वस्तये । अप नः शोशुचदघम् ।।८।। – ऋ. १.९७.७-८
जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः ।।१।। – ऋ. १.९९.१
तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः ।
तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः ।।३।। – ऋ. १.११६.३
अनारम्भणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे ।
यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम् ।।५।। – ऋ. १.११६.५
त्वं सूरो हरितो रामयो नॄन् भरच्चक्रमेतशो नायमिन्द्र ।
प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून् ।।१३।। – ऋ. १.१२१.१३
विश्वेषु हि त्वा सवनेषु तुञ्जते समानमेकं वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक् ।
तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि ।
इन्द्रं न यज्ञैश्चितयन्त आयवः स्तोमेभिरिन्द्रमायवः ।।२।। – ऋ. १.१३१.२
रथाय नावमुत नो गृहाय नित्यारित्रां पद्वतीं रास्यग्ने ।
अस्माकं वीराँ उत नो मघोनो जनाँश्च या पारयाच्छर्म या च ।।१२।। – ऋ. १.१४०.१२
अवविद्धं तौग्र्यमप्स्वन्तरनारम्भणे तमसि प्रविद्धम् ।
चतस्रो नावो जठलस्य जुष्टा उदश्विभ्यामिषिताः पारयन्ति ।।६।। – ऋ. १.१८२.६
प्र ते नावं न समने वचस्युवं ब्रह्मणा यामि सवनेषु दाधृषिः ।
कुविन्नो अस्य वचसो निबोधिषदिन्द्रमुत्सं न वसुनः सिचामहे ।।७।। – ऋ. २.१६.७
नावेव नः पारयतं युगेव नभ्येव न उपधीव प्रधीव ।

श्वानेव नो अरिषण्या तनूनां खृगलेव विस्रसः पातमस्मान् ।।४।। – ऋ. २.३९.४
कनिक्रदज्जनुषं प्रब्रुवाण इयर्ति वाचमरितेव नावम् ।
सुमङ्गलश्च शकुने भवासि मा त्वा का चिदभिभा विश्व्या विदत् ।।१।। – ऋ. २.४२.१
विवेष यन्मा धिषणा जजान स्तवै पुरा पार्यादिन्द्रमह्नः ।
अंहसो यत्र पीपरद् यथा नो नावेव यान्तमुभये हवन्ते ।।१४।। – ऋ. ३.३२.१४
विश्वानि नो दुर्गहा जातवेदः सिन्धुं न नावा दुरितातिं पर्षि ।
अग्ने अत्रिवन्नमसा गृणानोऽस्माकं बोध्यविता तनूनाम् ।।६।। – ऋ. ५.४.६
एवाँ अग्निं वसूयवः सहसानं ववन्दिम ।
स नो विश्वा अति द्विषः पर्षन्नावेव सुक्रतुः ।।६।। – ऋ. ५.२५.६
आ सूर्यो अरुहच्छुक्रमर्णोऽयुक्त यद्धरितो वीतपृष्ठाः ।
उद्ना न नावमनयन्त धीरा आशृण्वतीरापो अर्वागतिष्ठन् ।।१०।। – ऋ. ५.४५.१०
व्यक्तून् रुद्रा व्यहानि शिक्वसो व्यन्तरिक्षं वि रजांसि धूतयः ।
वि यदज्राँ अजथ नाव ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ ।।४।। – ऋ. ५.५४.४
अमादेषां भियसा भूमिरेजति नौर्न पूर्णा क्षरति व्यथिर्यती ।
दूरेदृशो ये चितयन्त एमभि—रन्तर्महे विदथे येतिरे नरः ।।२।। – ऋ. ५.५९.२
यास्ते पूषन्नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति ।
ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः ।।३।। – ऋ. ६.५८.३
नू न इन्द्रावरुणा गृणाना पृङ्क्तं रयिं सौश्रवसाय देवा ।
इत्था गृणन्तो महिनस्य शर्धोऽपो न नावा दुरिता तरेम ।।८। –ऋ. ६.६८.८
ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय ।
ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम ।।३।। - ऋ. ७.६५.३
आ यद् रुहाव वरुणश्च नावं प्र यत् समुद्रमीरयाव मध्यम् ।
अधि यदपां स्नुभिश्चराव प्र प्रेङ्ख ईङ्खयावहै शुभे कम् ।।३।।
वसिष्ठं ह वरुणो नाव्याधा—दृषिं चकार स्वपा महोभिः ।
स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन् यादुषासः ।।४।।- ऋ. ७.८८.३-४
स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः । इन्द्रो विश्वा अति द्विषः ।।११।। - ऋ. ८.१६.११
ते नो भद्रेण शर्मणा युष्माकं नावा वसवः । अति विश्वानि दुरिता पिपर्तन ।।१७।। - ऋ. ८.१८.१७

ते नो नावमुरुष्यत दिवा नक्तं सुदानवः । अरिष्यन्तो नि पायुभिः सचेमहि ।।११।। - ऋ. ८.२५.११
इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि ।
ययाति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेम ।।३।। - ऋ. ८.४२.३
मा नः समस्य दूढ्यः परिद्वेषसो अंहतिः । ऊर्मिर्न नावमा वधीत् ।।९।। - ऋ. ८.७५.९
अति नो विष्पिता पुरु नौभिरपो न पर्षथ । यूयमृतस्य रथ्यः ।।३।। - ऋ. ८.८३.३
समी सखायो अस्वरन् वने क्रीळन्तमत्यविम् । इन्दुं नावा अनूषत ।।५।। – ऋ. ९.४५.५
हितो न सप्तिरभि वाजमर्षेन्द्रस्येन्दो जठरमा पवस्व ।
नावा न सिन्धुमति पर्षि विद्वाञ्छूरो न युध्यन्नव नो निद स्पः ।।१०।।– ऋ. ९.७०.१०
स्रक्वे द्रप्सस्य धमतः समस्वरन्नृतस्य योना समरन्त नाभयः ।
त्रीन् त्स मूर्ध्नो असुरश्चक्र आरभे सत्यस्य नावः सुकृतमपीपरन् ।।१।। - ऋ. ९.७३.१
राजा सिन्धूनामवसिष्ट वास ऋतस्य नावमारुहद्रजिष्ठाम् ।
अप्सु द्रप्सो वावृधे श्येनजूतो दुह ईं पिता दुह ईं पितुर्जाम् ।।२।। – ऋ. ९.८९.२
हरिः सृजानः पथ्यामृतस्येयर्ति वाचमरितेव नावम् ।
देवो देवानां गुह्यानि नामाऽऽविष्कृणोति बर्हिषि प्रवाचे ।।२।। – ऋ. ९.९५.२
पृथक् प्रायन् प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा ।
न ये शेकुर्यज्ञियां नावमारुहमीर्मैव ते न्यविशन्त केपयः ।।६।। – ऋ. १०.४४.६
नावा न क्षोदः प्रदिशः पृथिव्याः स्वस्तिभिरति दुर्गाणि विश्वा ।
स्वां प्रजां बृहदुक्थो महित्वाऽऽवरेष्वदधादा परेषु ।।७।। – ऋ. १०.५६.७
सुत्रामाणंपृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् ।
दैवीं नावं स्वरित्रामनागसमस्रवन्तीमा रुहेमा स्वस्तये ।।१०।। – ऋ. १०.६३.१०
मन्द्रा कृणुध्वं धिय आ तनुध्वं नावमरित्रपरणीं कृणुध्वम् ।
इष्कृणुध्वमायुधारं कृणुध्वं प्राञ्चं यज्ञं प्र णयता सखायः ।।२।। – ऋ १०.१०१.२
ऊर्ध्वा यत् ते त्रेतिनी भूद्यज्ञस्य धूर्षु सद्मन् । सजूर्नावं स्वयशसं सचायोः ।।९।। – ऋ. १०.१०५.९
प्रेन्द्राग्निभ्यां सुवचस्यामियर्मि सिन्धाविव प्रेरयं नावमर्कैः ।
अया इव परि चरन्ति देवा ये अस्मभ्यं धनदा उद्भिदश्च ।।९।। - ऋ. १०.११६.९
यं कुमार प्रावर्तयो रथं विप्रेभ्यस्परि ।
तं सामानु प्रावर्तत समितो नाव्याहितम् ।।४।। – ऋ. १०.१३५.४

इन्द्रस्येव रातिमाजोहुवानाः स्वस्तये नावमिवा रुहेम ।
उर्वी न पृथ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषाम ।।२।। - ऋ. १०.१७८.२

ॐभगस्य नावमा रोह पूर्णामनुपदस्वतीम् । तयोपप्रतारय यो वरः प्रतिकाम्यः ।। - अ. २.३६.५
ॐतेऽधराञ्चः प्र प्लवन्तां छिन्ना नौरिव बन्धनात् । न वैबाधप्रणुत्तानां पुनरस्ति निवर्तनम् ।। - अ. ३.६.७
ॐद्विषो नो विश्वतोमुखाति नावेव पारय । अप नः शोशुचदघम् ।। स नः सिन्धुमिव नावाति पर्षा स्वस्तये । अप नः शोशुचदघम् ।। - अ. ४.३३.७-८
ॐहिरण्ययाः पन्थान आसन्नरित्राणि हिरण्यया । नावो हिरण्ययीरासन् याभिः कुष्ठं निरावहन् ।। - अथर्ववेद ५.४.५
ॐतद् वै राष्ट्रमा स्रवति नावं भिन्नामिवोदकम् । ब्रह्माणं यत्र हिंसन्ति तद् राष्ट्रं हन्ति दुच्छुना ।। - अ. ५.१९.८
ॐहिरण्ययी नौरचरद्धिरण्यबन्धना दिवि । तत्रामृतस्य पुष्पं देवाः कुष्ठमवन्वत ।। - अ. ६.९५.२
ॐसुत्रामाणं पृथिवीं द्यामनेहसं सुशर्माणमदितिं सुप्रणीतिम् । दैवीं नावं स्वरित्रामनागसो अस्रवन्तीमा रुहेमा स्वस्तये ।। - अ. ७६.३
ॐयाः कृत्या आङ्गिरसीर्याः कृत्या आसुरीर्याः कृत्याः स्वयंकृता या उ चान्येभिराभृताः । उभयीस्ताः परा यन्तु परावतो नवतिं नाव्या३ अति ।। - अ. ८.५.९
ॐसिंहस्येव स्तनथोः सं विजन्तेऽग्नेरिव विजन्त आभृताभ्यः । गवां यक्ष्मः पुरुषाणां वीरुद्भिरतिनुत्तो नाव्या

एतु स्त्रोत्याः ।। - अ. ८.७.१५
ॐकामस्येन्द्रस्य वरुणस्य राज्ञो विष्णोर्बलेन सवितुः सवेन । अग्नेर्होत्रेण प्र णुदे सपत्नांछम्बीव नावमुदकेषु धीरः ।। - अ. ६.२.६
ॐते ऽधराञ्चः प्र प्लवन्तां छिन्ना नौरिव बन्धनात् । न सायकप्रणुत्तानां पुनरस्ति निवर्तनम् ।। - अ. ६.२.१२
ॐपराक् ते ज्योतिरपथं ते अर्वागन्यत्रास्मदयना कृणुष्व । परेणेहि नवतिं नाव्या अति दुर्गाः स्त्रोत्या मा क्षणिष्ठाः परेहि ।। - अ. १०.१.१६
ॐअनड्वाहं प्लवमन्वारभध्वं स वो निर्वक्षद् दुरितादवद्यात् । आ रोहत सवितुर्नावमेतां षड्भिरुर्वीभिरमतिं तरेम ।। - अ. १२.२.४८
ॐआदित्य नावमारुक्षः शतारित्रां स्वस्तये । अहर्मात्यपीपरो रात्रिं सत्राति पारय ।। सूर्य नावमारुक्षः शतारित्रां स्वस्तये । रात्रिं मात्यपीपरोऽहः सत्राति पारय ।। - अ. १७.१.२५-२६
ॐहिरण्ययी नौरचद्धिरण्यबन्धना दिवि । तत्रामृतस्य चक्षणं ततः कुष्ठो अजायत । स कुष्ठो विश्वभेषजः साकं सोमेन तिष्ठति । तक्मानं सर्वं नाशय सर्वाश्च यातुधान्यः ।। - अ. १९.३९.७
ॐस नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः । इन्द्रो विश्वा अति द्विषः ।। - अ. २०.४६.२
ॐविश्वेषु हि त्वा सवनेषु तुञ्जते समानमेकं वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक् । तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि । इन्द्रं न यज्ञैश्चितयन्त आयव स्तोमेभिरिन्द्रमायवः ।। - अ. २०.७२.१
ॐपृथक् प्रायन् प्रथमा देवहूतयोऽकृणवत श्रवस्यानि दुष्टरा । न ये शेकुर्यज्ञियां नावमारुहमीर्मैव ते न्यविशन्त केपयः ।। - अ. २०.९४.६
ॐययाऽति विश्वा दुरिता तरेम सुतर्माणमधि नावं रुहेमेति यज्ञो वै सुतर्मा नौः कृष्णाजिनं वै सुतर्मा नौर्वाग्वै सुतर्मा नौर्वाचमेव तदारुह्य तया स्वर्गं लोकमभि संतरति - ऐतरेय ब्राह्मण १.१३
ॐबृहद्रथंतरे सामनी भवत एते वै यज्ञस्य नावौ संपारिण्यौ यद्बृहद्रथंतरे ताभ्यामेव तत्संवत्सरं तरन्ति - - - - - - ते उभे न समवसृज्ये य उभे समवसृजेयुर्यथैव च्छिन्ना नौर्बन्धनात्तीरं तीरमृच्छन्ती प्लवेतैवमेव ते सत्रिणस्तीरं तीरमृच्छन्तः प्लवेरन्य उभे समवसृजेयुः - ऐ.ब्रा. ४.१३
ॐनावमिवाऽऽरुहेमेति समेवैनमेतदधिरोहति स्वर्गस्य लोकस्य समष्ट्यै संपत्त्यै संगत्यै - ऐ.ब्रा. ४.२०
ॐऋजुनीती वो वरुण इति मैत्रावरुणस्य - - - - इन्द्रं वो विश्वतस्परीति ब्राह्मणाच्छंसिनो - - - - यत्सोम आ सुते नर इत्यच्छावाकस्य - - - ता वा एताः स्वर्गस्य लोकस्य नावः संपारिण्यः स्वर्गमेवैताभिर्लोकमभिसंतरन्ति - ऐ.ब्रा. ६.७
ॐतद्यथा समुद्रं प्रप्लवेरन्नेवं हैव ते प्रप्लवन्ते ये संवत्सर वा द्वादशाहं वाऽऽसमे तद्यथा सैरावतीं नावं पारकामाः समारोहेयुरेवमेवैतास्त्रिष्टुभः समारोहन्ति - ऐ.ब्रा. ६.२१
ॐप्राचीनवंशप्रविष्टयजमानस्य दीक्षाङ्गभूता मन्त्राः । अथ दक्षिणं जान्वाच्याभिसर्पति - इमां धियँ शिक्षमाणस्य देव क्रतुं दक्षं वरुण सꣳशिशाधि ययाऽति विश्वा दुरिता तरेम सुतर्माणमधि नावꣳ रुहेम - तै.सं. १.२.२.२
ॐअꣳहसो यत्र पीपरद्यथा नो नावेव यान्तमुभये हवन्ते (यथा लोके नावा नद्यां यान्तं नाविकमुभये कूलद्वयवर्तिनो हवन्ते मामुत्तारयेत्याह्वयन्ति तथैवांहसो मुक्तानस्मानुभयकूलप्रभवा आह्वयन्ति - सायण) - तै.सं. १.६.१२.३
ॐसंवर्गेष्टिहोत्रमन्त्राभिधानम् - - - - समस्य दूढ्यः परिद्वेषसो अꣳहतिः । ऊर्मिर्न नावमा वधीत् ।
ॐवृष्टिसन्यादीष्टकापञ्चकाभिधानम् : यथाऽप्सु नावा संयात्येवम् एवैताभिर्यजमान इमाँल्लोकान्त्सं याति

प्लवो वै एषोऽग्नेर्यत्संयानीर्यत्संयानीरुपदधाति प्लवमेवैतमग्नय उप दधाति - तै.सं. ५.३.१०.२
ॐमनु व मत्स्य का आख्यान - मनवे ह वै प्रातरवनेग्यमुदकमाजह्रुः , यथेदं पाणिभ्यामवनेजनायाहरन्ति - एवम् । तस्यावनेनिजानस्य मत्स्यः पाणी आपेदे । - - - स औघ उत्थिते नावमापद्यासै, ततस्त्वा पारयितास्मि । तमेवं भृत्वा समुद्रमभ्यवजहार । स यतिथीं तत्समां परिदिदेश - ततिथीं समां नावमुपकल्प्योपासाञ्चक्रे । स औघ उत्थिते नावमापेदे । तं स मत्स्य उपन्यापुप्लुवे । तस्य शृङ्गे नावः पाशं प्रतिमुमोच । तेनैनमुत्तरं गिरिमतिदुद्राव । स होवाच - अपीपरं वै त्वा, वृक्षे नावं प्रतिबध्नीष्व, तं तु त्वा मा गिरौ सन्तमुदकमन्तश्छैत्सीद् , यावद् यावदुदकं समवायात् तावत् तावदन्ववसर्पासि इति । - - -- शतपथ ब्राह्मण १.८.१.१ - १०
ॐनौर्ह वा एषा स्वर्ग्या - यदग्निहोत्रम् । तस्या एतस्यै नावः स्वर्ग्याया आहवनीयश्चैव गार्हपत्यश्च नौमण्डे । अथैष एव नावाजो यत्क्षीरहोता । - श.ब्रा. २.३.३.१५
ॐनावश्चरन्ति स्वसिच इयानाः, ता आववृत्रन्नधरागुदक्ता अहिं बुध्न्यमनुरीयमाणाः । - श.ब्रा. ५.४.२.५
ॐआपो वै सर्वे देवाः सर्वाणि भूतानि । ता हैता आप एवैषोऽग्निश्चितः । तस्य नाव्या एव परिश्रितः । ताः षष्टिश्च त्रीणि च शतानि भवन्ति । षष्टिश्च ह वै त्रीणि च शतान्यादित्यं नाव्याः समन्तं परियन्ति । नाव्या उ एव यजुष्मत्य इष्टकाः । ताः षष्टिश्च ह वै त्रीणि च शतानि भवन्ति । षष्टिश्च ह वै त्रीणि च शतान्यादित्यं नाव्या अभिक्षरन्ति । अथ यदन्तरा नाव्ये तत्सूददोहाः । अथ या अमूः षट्त्रिंशदिष्टका अतियन्ति, यः स त्रयोदशो मासः - आत्माऽयमेव स योऽयं हिरण्मयः पुरुषः । - श.ब्रा. १०.५.४.१४
ॐकूर्चब्राह्मणम् :– स (याज्ञवल्क्यः) होवाच । यथा वै सम्राट् महान्तमध्वानमेष्यन् रथं वा नावं वा समाददीत । एवमेव एताभिरुपनिषद्भिः समाहितात्माऽसि । - श.ब्रा. १४.६.११.१/बृहदारण्यक उपनिषद ३.११.१
ॐउपहोमाः । अच्छिद्रकाण्डम् :– विश्वानि नो दुर्गहा जातवेदः । सिन्धुं न नावा दुरिताऽतिपर्षि । अग्ने अत्रिवन्मनसा गृणानः । अस्माकं बोध्यविता तनूनाम् । - तै.ब्रा. २.४.१.५
ॐयास्ते पूषन्नावो अन्तः समुद्रे । हिरण्ययीरन्तरिक्षे चरन्ति । याभिर्यासि दूत्याꣳ सूर्यस्य । कामेन कृतः श्रव इच्छमानः - तै.ब्रा. २.५.५.५
ॐसौम्यादि पशुसूक्ताभिधानम् । हविषो याज्या :– अनु स्वधामक्षरन्नापो अस्य । अवर्धत मध्य आ नाव्यानाम् । सध्रीचीनेन मनसा तमिन्द्र ओजिष्ठेन । हन्मनाऽहन्नभिद्यून् - तैत्तिरीय ब्राह्मण २.८.३.४
ॐहविषः पुरोनुवाक्या :– ब्रह्मन्देवास्त्रयस्त्रिꣳशत् । ब्रह्मन्निद्रप्रजापती । ब्रह्मन्ह विश्वा भूतानि । नावीवान्तः समाहिता - तै.ब्रा. २.८.८.१०
ॐऐन्द्राग्नि पश्वादीनां सूक्तानि :– यास्ते पूषन्नावो अन्तः - - - - तै.ब्रा. २.८.५.३
ॐप्रेङ्खारोहणम् :– अन्वञ्चमधिरोहेदित्याहुरनूचीं वै नावमधिरोहन्ति नौर्वैषा स्वर्गयाणी यत्प्रेङ्ख - ऐतरेय आरण्यक १.२.४
ॐस ततस् स्वधाम् एव हिरण्मयीं नावं समारुह्य प्रजापतेस् सलोकताम् अभिप्रयाति । - जै.ब्रा. १.२६
ॐतेषां ह त्रिशीर्ष गन्धर्वो विजयस्यावेत् । स हैषास । तस्य हाप्स्व् अन्तर् नौनगरं परिप्लवम् आस । - - - - स (इन्द्रः) ह तद् एव नौमण्ड उपशिश्लेष जलायुका वा तृणकं वा भूत्वा । - - - जैमिनीय ब्राह्मण १.१२५
ॐयां ह खलु वै पितापुत्रौ नावम् अजतो न सा रिष्यति । दैव्य् एषा नौर् यद् यज्ञः । ताव् एतत् पितापुत्राव् एवाजतः । औशनं पुरस्तात् भवति कावम् उपरिष्टाद् यज्ञस्यैवारिष्ट्यै । तस्माद् यद् अदाशा नावम्

अधिरोहन्ति पितापुत्रौ हैवाग्रे ऽधिरोहत: । - जै. ब्रा. १. १६६
ॐअथो समुद्र एष यद् रथन्तरम् । अथ यो ऽन्यत्राक्षरेभ्यस् स्तोब्धि स एवैतं समुद्रं प्रविशति । अथ यो ऽक्षरेषु स्तोब्धि यथा नावा वा प्लवेन वा द्वीपाद् द्वीपं संक्रामेद् एवम् एवैतं समुद्रम् अतितरति । - जै. ब्रा. १. ३३२
ॐऔशनं पुरस्ताद् भवति कावम् उपरिष्टात् । ताव् एतत् पितापुत्राव् एव नावम् अजत: । स यथा पितापुत्रौ नावम् अजन्तौ ताम् अरिष्टां स्वस्ति पारं गमयेयाताम्, एवम् एवैतद् औशनकावाभ्यां स्वस्त्य् अरिष्टा उदृचम् अश्नुवते । - जै. ब्रा. २. ४२१
ॐओघो वा इमान् लोकान् निरमार्ट् । सो ऽमन्यत मनुर् इदं वावेदम् अभूद् इति । सो ऽकामयतोद् इत इयां गातुं प्रतिष्ठां विन्देयेति । स एते सामनी अपश्यत् । ताभ्याम् अस्तुत । ते एनं हिरण्मय्यौ नावौ भूत्वोपाप्लवेताम् । तयो: प्रत्यतिष्ठत् । ते एनम् उदपारयेताम् । - जै. ब्रा. ३. ६६
ॐयथा नावातिपारयेद् एवम् एवैभ्य एतद् अग्निर् हव्यं नवमाद् अह्नो दशमम् अहर् अभ्य् अत्यपारयत् । एष ह वा एतद् अतिपारयतितुम् अर्हति - जै. ब्रा. ३. २६६
ॐरोहिणी: पिङ्गला एकरूपा: । क्षरन्ती: पिङ्गला एकरूपा: । शतꣳ सहस्राणि प्रयुतानि नाव्यानाम् ।
ॐत्युग्रो ह भुज्युमश्विनोदमेघे । रयिं न कश्चिन्ममृवां३ अवाहा: । तमूहथुर्नौभिरात्मन्वतीभि: । अन्तरिक्षप्रुड्भिरपोदकाभि: । - तै. आ. १. १०. २
ॐयोऽप्सु नावं प्रतिष्ठितां वेद । प्रत्येव तिष्ठति । इमे वै लोका अप्सु प्रतिष्ठिता: । तदेषाऽभ्यनूक्ता । - तै. आ. १. २२. ७
ॐद्विषो नो विश्वतो मुखाऽति नावेव पारय । अप न: शोशुचदघम् । स न: सिन्धुमिव नावयाऽतिपर्षा स्वस्तये । अप न: शोशुचदघम् । - तै. आ. ६. ११. २
ॐविश्वानि नो दुर्गहा जातवेद: सिन्धुं न नावा दुरिताऽतिपर्षि । अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ।। - तैत्तिरीय आरण्यक १०. १. --
ॐअथात आरम्भणीया एव । ऋजुनीती नो वरुण: इति मैत्रावरुणस्य । - - - इन्द्रं वो विश्वतस्परि इति ब्राह्मणाच्छंसिन: । - - - - यत् सोम आ सुते नर: इति अच्छावाकस्य । - - - ता वा एता: स्वर्गस्य लोकस्य नाव: संतारण्य: । - गोपथ ब्राह्मण २. ५. १२
ॐयथा वै समुद्रं प्रतरेयु:, एवं हैवैते प्रप्लवन्ते, ये संवत्सरं द्वादशाहं वोपासते । तद् यथा सैरावतीं नावं पारकामा: समारोहेयु:, एवं हैवैतास्त्रिष्टुभ: स्वर्गकामा: समारोहन्ति । - गोपथ ब्राह्मण २. ६. ३